**दिनाङ्कः- 13.04.2024**
**प्रातः- 06:55**

## अथ वार्ताः विस्तरेण

### निर्वाचनायोग-समीक्षा

निर्वाचनायोगेन प्रथमचरणीय-लोकसभानिर्वाचनस्य सज्जतायाः समीक्षा कृता। आयोगेन देशे पञ्चाशदाधिक-त्रिशततोप्यधिकैः निर्वाचनपर्यवेक्षकैः सह संवादं विहितम्। एकविंशतिराज्येषु द्वयाधिकैकशतं–संसदीयक्षेत्रेषु अस्य मासस्य नवदशदिनाङ्के मतदानं भविष्यति। अस्मिन् चरणे स्वतन्त्रं निष्पक्षं च मतदानं सुनिश्चेतुं निर्वाचनायोगन सप्तविंशत्यधिकैकशतं-सामान्याः, सप्तषष्टिः-आरक्षि, सप्तषष्ट्योत्तरैक शतं यावत् व्ययपर्यवेक्षकाः च नियोजिताः सन्ति ।

### प्रचाराभियानम्

प्रथमचरणीय मतदाने सप्तदिनानि एव अवशिष्टानि अतः दलानां प्रचारोपि वर्धितः। देशे सर्वत्र विभिन्नराजनैतिकदलानां शीर्षनेतारः नैरन्तर्येण देशस्य विभिन्नेषु भागेषु नैर्वाचनिक-सम्मर्देषु संघर्षरताः सन्ति। प्रधानमन्त्रिणा भाजपेति दलस्य वरिष्ठनेत्रा च नरेन्द्रमोदिना ह्यः बाड़मेरनगरे निर्वाचनसभां संबोधयता प्रोक्तं यत् विपक्षदलानि संविधानस्य आवरणे असत्यं आच्छादयन्ति। सः स्पष्टं कृतवान् यत् संविधानं कस्यापि परिस्थितौ निरस्तं कर्तुं न शक्यते। श्रीमोदी अवदत् यत् काङ्ग्रेसदलेन दशकं यावत् अनुसूचितजाति-अनुसूचितजनजातीः विरुद्धं भेदभावं कृतम्, अद्य च संविधानस्य नामाधारे मृषा भाशयति।

प्रधानमन्त्रिणा भाजपादलस्य प्रमुखनेत्रा नरेन्द्रमोदिना ह्य: जम्मूकश्मीरस्य उधमपुरक्षेत्रे एका नैर्वाचनिक-सभा सम्बोधिता, उक्तञ्च तेन यत् तस्य प्रशासनेन केन्द्रशासितप्रदेशानां सुदीर्घा पीडापरम्परा शमिता। तेन जना: आश्वासिता: यत् शीघ्रमेव जम्मूकश्मीरं केन्द्रशासितप्रदेशात् पूर्णराज्यं भविष्यति, सहैव हि अत्र विधानसभा-निर्वाचनान्यपि सम्पत्स्यन्ते। तेन अग्रे उक्तम् यत् दशकेभ्य: अनन्तरं जम्मूकश्मीरे आतंकवादस्य भयं विना, विनैव च सीमासम्बन्धितया अशान्त्या सह राज्ये निर्वाचनं भवति। तेन वंशवादीयां राजनीतिं आलोच्यता प्रोक्तं यत् केनापि जम्मूकश्मीरराज्यस्य तादृशी हानि: न कृता यादृशी हानि: परिवार परिचालितै: दलै: कृतमिति। तेनोक्तं यत् संभावितानि निर्वाचनानि केवलं सांसदानां निर्वाचनानि न सन्ति, अपितु सुदृढस्य केन्द्रप्रशासनस्य घटनाय सन्ति। ध्येयं वर्तते यत् प्रथमचरणे अस्मिन् सप्तदश-राज्यानां, चतुर्णाञ्च केन्द्रशासितप्रदेशानां द्व्यधिकैकशतलोकसभा - क्षेत्रै: सह सिक्किमप्रदेशस्य द्वात्रिंशत्-विधानसभा क्षेत्रेषु, अरूणाचलप्रदेशस्य च षष्टिविधानसभा क्षेत्रेषु अस्य मासस्य एकोनविंशतिदिनांके मतदानं भविता।

### तृतीयचरणीय मतदानम्

लोकसभाया: तृतीयचरणीय-मतदानाय नामांकन-पूरणस्य प्रक्रिया निर्वाचनायोगस्य अधिसूचनाया: अनन्तरम् प्रवर्धते। अस्मिन् निर्वाचनचरणे मतदानं मई मासस्य सप्तमे दिनांके भविष्यति। यत्र-दशराज्यै: सह- द्वयो: केन्द्रशासित प्रदेशयो: चतुर्णवति लोकसभा-क्षेत्रेषु मतदानं भविष्यति।

### आई.पी.एल. क्रिकेट-क्रीडा

आई.पी.एल. इति क्रिकेट-क्रीडामालिकायाम् ह्य: दिल्लीकैपिटल्स-दलेन लखनऊ-सुपर-जाइंट्स इत्येतं दलं षड् स्तोभै: पराजितम्। तत्रैव अद्य अन्यतमा प्रतिस्पर्धा मोहाली नगरे क्रिकेट-क्रीडांगणे पंजाब किंग्स-राजस्थान-रॉयल्स-दलयोर्मध्ये सायं सार्धसप्तवादने भविष्यति।

**।। इति वार्ता : ।।**